विशेषः । त्वगुपकारकः । स च त्रिविधः । उष्णः । शीतः । अनुष्णाशीतः । पृथिव्याः स्पर्शः काठिन्यादिः पाकजः । जलपरमाणुस्पर्शः नित्यः । अन्यत्रानित्यः । वैशेषिकमते पार्थिवपरमाणुमात्रस्य पाकजस्पर्शः । नैयायिकमते तु द्व्यणुकादिस्पर्शोऽपि पाकजः । यथा,—

"स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः ।
अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः ॥
काठिन्यादिः क्षितावेव नित्यतादि च पूर्ब्बवत् ।
एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित् ॥
तत्रापि परमाणौ स्यात् पाको वैशेषिके नये ।
नैयायिकानान्तु नये द्व्यणुकादावपीष्यते ॥"
इति भाषापरिच्छेदः ॥

स्पर्शं निरूपयति । स्पर्श इति । उपकारक इति स्पर्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः । अनुष्णाशीतेति । पृथिव्या वायोः स्पर्शोऽनुष्णाशीतः जलस्य शीतः । तेजस उष्णः । काठिन्येति । कठिनसुकुमारस्पर्शः पृथिव्या एव इत्यर्थः । कठिनत्वादिकन्तु न संयोगनिष्ठो जातिविशेष, चक्षुर्ग्राह्यतापत्तेः । पूर्ब्बवत् जलतेजोवायुपरमाणुस्पर्शा नित्याः इत्यर्थः । तद्भिन्नाः स्पर्शास्त्वनित्या इत्यर्थः । एतेषां रूपरसगन्धस्पर्शानाम् । नान्यत्रेति । पृथिव्या हि रूपरसगन्धस्पर्शपरावृत्तिः पाकरससंयोगादुपलभ्यते । न हि शतधापि ध्मायमाने जलादौ रूपादिकं परावर्त्तते नीरे सौकरमौष्ण्यञ्च नयव्यतिरेकाभ्यामुपाधेरेवेति निलीयते पवनपृथिव्योः शीतस्पर्शादिवत् पृथिव्यप्वपि मध्ये परमाणावेव रूपादीनां पाकः इति वैशेषिका वदन्ति । नैयायिकानामिति नैयायिकानां मते द्व्यणुकादौ अवयविन्यपि पाको भवति । इति सिद्धान्तमुक्तावली ॥ * ॥

पुराणमते एकादशविधस्पर्शो यथा । उष्णः १ शीतः २ सुखः ३ दुःखः ४ स्निग्धः ५ विशदः ६ खरः ७ मृदुः ८ श्लक्ष्णः ९ लघुः १० गुरुः ११ । इति महाभारते मोक्षधर्म्मः ॥ कठिनः । इति तत्रैव आश्वमेधिकपर्व्व ॥ आचमनाङ्गस्पर्शनं आचमनशब्दे द्रष्टव्यम् ॥ * ॥ उच्छिष्टस्य स्पर्शनिषेधो यथा,—

"न स्पृशेत् पाणिनोच्छिष्टो विप्रगोब्राह्मणानलान् ।
न चानलं पदा वापि न देवप्रतिमां स्पृशेत् ॥"
इति कौर्म्मे उपविभागे । १६ । ३५ ॥

अथ उच्छिष्टस्य चाण्डालादिस्पर्शप्रायश्चित्तम् । आपस्तम्बः ।

"भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा ।
प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्याद्विशोधनम् ॥
गायत्र्यष्टसहस्रन्तु द्रुपदां वा शतं जपेत् ।
त्रिरात्रोपोषिता भूत्वा पञ्चगव्येन शुध्यति ॥
भुक्तोच्छिष्टोऽन्त्यजैः स्पृष्टः प्राजापत्यं समाचरेत् ।
अर्द्धोच्छिष्टे स्मृतः पादः पाद आमाशने तथा ॥"

प्राजापत्यं स्नाने । अर्द्धोच्छिष्टो येन आद्यग्रासः आस्ये निःक्षिप्तः न तु निगीर्णः । दक्षः ।

"पाने मैथुनसंसर्गे तथा मूत्रपुरीषयोः ।
स्पर्शनं यदि गच्छेत्तु शवोदक्यान्त्यजैः सह ॥
दिनमेकं चरेन्मूत्रे पुरीषे तु दिनद्वयम् ।
दिनत्रयं मैथुने स्यात् पाने स्याच्च चतुष्टयम् ॥"

काश्यपः ।

"श्वशूकरान्त्यचाण्डालमद्यभाण्डरजस्वलाः ।
यद्युच्छिष्टः स्पृशेत् तत्र कृच्छ्रं सान्तपनं चरेत् ॥"

एतज्ज्ञानाभ्यासे । सान्तपने धेनुद्वयम् । ब्रह्मपुराणे ।

"उच्छिष्टेन तु शूद्रेण विप्रः स्पृष्टस्तु तादृशः ।
उपवासेन शुद्धिः स्यात् शुना संस्पृष्ट एव वा ॥
उच्छिष्टेन तु विप्रेण विप्रः स्पृष्टस्तु तादृशः ।
उभौ स्नानं प्रकुरुतः सद्य एव समाहितौ ॥"

अनुच्छिष्टब्राह्मणस्य नक्तमिति प्रायश्चित्तविवेकः ॥ * ॥ अथ रजस्वलास्पर्शप्रायश्चित्तम् । काश्यपः ।

"रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि ।
एकरात्रं निराहारा पञ्चगव्येन शुध्यति ॥
रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी तु या ।
त्रिरात्रेण विशुद्धिः स्यात् व्याघ्रस्य वचनं यथा ॥
रजस्वला तु संस्पृष्टा वैश्यया ब्राह्मणी च या ।
पञ्चरात्रनिराहारा पञ्चगव्येन शुध्यति ॥
रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी यदि ।
षड्रात्रेण विशुध्येत्तु ब्राह्मणी कामचारतः ॥
अकामतश्चरेदर्द्धं ब्राह्मणी सर्व्वजातिषु ॥"

एतेन रजस्वलाया ब्राह्मण्याः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानं कामतः । अकामतस्त्वर्द्धं नक्तव्रतम् । असवर्णरजस्वलास्पर्शे त्रिरात्रपञ्चरात्रषड्रात्रोपवासाः । अकामतस्त्वर्द्धं एतच्चतुर्थाहादनन्तरं कर्त्तव्यम् ।

"चाण्डालेन श्वपाकेन संस्पृष्टा चेद्रजस्वला ।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत् ॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति ।
तां निशान्तु व्यतिक्रम्य स्वजात्युक्तन्तु कारयेत् ॥"
इति वचनान्तरदर्शनात् ॥

एतत् कामतः । अत्र दिनभेदोऽपि नास्ति । अज्ञाने बृहस्पतिः ।

"पतितान्त्यश्वपाकैस्तु संस्पृष्टा स्त्री रजस्वला ।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत् ॥
प्रथमेऽह्नि त्रिरात्रन्तु द्वितीये द्व्यहमाचरेत् ।
अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमाचरेत् ॥"

चतुर्थेऽह्नीति शुद्धिस्नानात् पूर्ब्बम् । व्याघ्रः ।

"रजस्वला यदा स्पृष्टा श्वजम्बुकखरैः क्वचित् ।
निराहारा भवेत्तावत् यावत् स्नानेन शुध्यति ॥"

अत्रापि बृहस्पत्युक्तदिनभेदव्यवस्था । वृद्धशातातपः ।

"रजस्वले तु ये नार्य्यावन्योऽन्यं स्पृशतो यदि ।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्च्चमतः परम् ॥"

पञ्चगव्यपानं व्रतरूपं तेनोपवासः । ब्रह्मकूर्च्चमाह जाबालः ।

"अहोरात्रोपितो भूत्वा पौर्णमास्यां विशेषतः ।
पञ्चगव्यं पिबेत् प्रातः ब्रह्मकूर्च्चविधिः स्मृतः ॥"

तदशक्तौ पुराणैकं दातव्यम् । उच्छिष्टशूद्रादिस्पर्शे बृहस्पतिः ।

"शुना चोच्छिष्टया शूद्रा संस्पृष्टा द्व्यहमाचरेत् ।
अहोरात्रं तृतीयेऽह्नि परतो नक्तमाचरेत् ॥"

परतश्चतुर्थदिने स्नानात् पूर्वमिति ज्ञेयम् । इति प्रायश्चित्ततत्त्वम् ॥ मत्स्यसूक्तोक्तास्पृश्यस्पर्शनप्रायश्चित्तं स्नानशब्दे द्रष्टव्यम् ॥ (त्रि, स्पर्शकः । आनन्दजनकः । यथा, भागवते । ३ । २१ । ८ ।

"श्वेतोत्पलक्रीड़नकं मनःस्पर्शस्मितेक्षणम् ॥")

स्पर्शकः, त्रि, (स्पृशतीति । स्पृश + ण्वुल् ।) स्पर्शनकर्त्ता । स्पृशधातोः कर्त्तरि णकप्रत्ययेन निष्पन्नः ॥

स्पर्शनं, क्ली, (स्पृश + ल्युट् ।) दानम् । स्पर्शः । इति मेदिनी ॥ (यथा, भागवते । १ । १० । १२ ।

"तस्मिन्नस्तधियः पार्थाः सहेरन् विरहं कथम् ।
दर्शनस्पर्शनालापशयनासनभोजनैः ॥"

सम्बन्धः । इति मल्लिनाथः ॥ यथा, रघुवंशे । २ । ५० ।

"तदक्ष कल्याणपरम्पराणां
भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्न-
मृद्धं हि राज्यं पदमैन्द्रमाहुः ॥")

स्पर्शनः, पुं, (स्पृशतीति । स्पृश + ल्युः ।) वायुः । इत्यमरः । १ । १ । ६४ ॥

स्पर्शमणिः, पुं, (स्पर्शप्रधानो मणिः । स्पर्शेन स्वर्णोत्पादकत्वात् तथात्वम् ।) स्पर्शमात्रेण स्वर्णजनकप्रस्तरविशेषः । परशपाथर इति भाषा । इति वक्ष्यमाणशब्ददर्शनात् ॥

स्पर्शमणिप्रभवं, क्ली,(स्पर्शमणिः प्रभवो यस्य ।) स्वर्णम् । इति शब्दरत्नावली ॥

स्पर्शलज्जा, स्त्री, (स्पर्शात् लज्जा संकोचनरूपत्रपा यस्याः ।) लज्जालुवृक्षः । इति शब्दचन्द्रिका ॥

स्पर्शशुद्धा, स्त्री, (स्पर्शे शुद्धा ।) शतमूली । इति शब्दचन्द्रिका ॥

स्पर्शस्यन्दः, पुं, (स्पर्शेन स्यन्दते मूत्रयतीति । स्यन्द + अच् ।) भेकः । इति केचित् ॥

स्पर्शा, स्त्री, (स्पृशति परपुरुषमिति । स्पृश + अच् । टाप् ।) कुलटा । इति धरणिः ॥

स्पर्शानन्दाः, स्त्री, (स्पर्शेन आनन्दो यासाम् ।) अप्सरसः । इति त्रिकाण्डशेषः ॥

स्पर्ष्टा, [ऋ] त्रि, (स्पृशतीति । स्पृश + तृच् ।) उपतापकमात्रम् । रोगः । इत्येके । इत्यमरटीकायां भरतः । ३ । २ । १४ ॥

स्पश, ञ ग्रन्थवाधयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ञ, स्पशति स्पशते । पस्पाश । ग्रन्थस्थाने स्पर्शनं पठन्ति केचित् । इति दुर्गादासः ॥